# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा** – आचार्यः -१ (SEM-1) | **प्रश्नपत्रम् -४**<br>(CC 4.1.3) | **गुणाः** – ७० |
| **विषयः-** नव्यन्यायः | | **ग्रन्थः-** न्यायभाष्यम् (प्र. अ- द्वि. अध्याये प्रमाणनिरूपणान्तम्) |
| **दिनाङ्कः** – १८/१२/२०१८ | | **समयः** – २ तः ५ |

**विभागः १**

**प्रश्नः १ निम्नलिखितयोः एकस्य समाधानं सप्रसङ्गं लिखत ।** ०५

१ प्रत्यक्षानुमानम् एकदेशग्रहणादुपलब्धेरिति सूत्राशयं वर्णयत ।

२ मनस्साधकसूत्रार्थं वर्णयत ।

**प्रश्नः २ निम्नलिखितयोः द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या ।** १०

१ समानानेकधर्मोपपत्तिविप्रतिपत्तिभ्यां संशयस्योत्पत्तिः कथम् ? व्याख्यात ।

२ 'तदत्यन्तविमोक्षोपवर्गः' सभाष्यं व्याख्यात ।

**विभागः २**

**प्रश्नः ३ निम्नलिखितयोः एकस्य उत्तरं सभाष्यं देयम् ।** ०५

१ जल्पसूत्रार्थं व्याख्यात ।

२ वादसूत्रार्थं व्याख्यात ।

**प्रश्नः ४ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

१ भेदसहितपञ्चावयवान् यथाभाष्यं सगृह्णीत ।

२ सव्यभिचारादित्रिकहेत्वाभासान् यथाभाष्यम् उपपादयत ।

**विभागः ३**

**प्रश्नः ५ निम्नलिखितयोः द्वयोरेकस्य सन्दर्भव्याख्या देया ।** ०५

१ सामान्यच्छलसूत्रार्थं विवृणुत ।

२ निग्रहस्थानसूत्रभाष्यार्थं संगृह्णीत ।

**प्रश्नः ६ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ प्रतिषेधप्रपञ्चं यथाभाष्यं विवृणुत।

२ प्रमेयता च तुलाप्रामाण्यवदिति सूत्राशयं वर्णयत।

**विभागः ४**

**प्रश्नः ७ निम्नलिखितयोः एकस्य उत्तरं सन्दर्भसहितं देयम्।** **०५**

१ 'अर्थविशेषप्राबल्यादि'ति सूत्रार्थं वर्णयत।

२ 'त्रैकाल्यसिद्धेः प्रतिषेधानुपपत्तिः' सूत्रार्थं व्याख्यात।

**प्रश्नः ८ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ प्रत्यक्षादिप्रमाणपरीक्षां यथाभाष्यं प्रतिपादयत।

२ 'न प्रदीपप्रकाशवत् तत्सिद्धे'रित्यस्य भावार्थं यथाभाष्यं विवृणुत।

**प्रश्नः ९ निम्नलिखितप्रश्नेषु दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** **१०**

१ प्रमाता कः ?

२ आत्मनो लिङ्गं किम् ?

३ प्रमाणं कतिविधम् ?

४ प्रमेयं कतिविधम् ? के च ते ?

५ भूतानि कानि ?

६ शरीरलक्षणं किम् ?

७ प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं किम् ?

८ विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणं किम् ?

९ कः विरुद्धः ?

१० व्यभिचारपदार्थः कः ?

११ न्यायशास्त्रप्रवर्तकः कः ?

१२ उपचारच्छलं किम् ?

१३ न्यायभाष्यकारः कः ?

१४ साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पात् कस्य बहुत्वम् ?

१५ आत्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः भवति न वा ?

------xxxxxx------